श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेदमार्गेत्यादि श्रीलक्ष्मी हयग्रीव दिव्यपादुकासेवक
श्रीमदभिनव वागीश ब्रह्मतन्त्र स्वतन्त्र परकाल महादेशिक
दिव्य चरणारविन्दे भक्त्या समर्पित
दासेन योगानृसिंहशर्मणा रचितं

# ॥ भूर्यब्धिनाथ सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ भूर्यब्धिनाथ सुप्रभातम् ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम्॥

अव्याज वात्स्य करुणार्द्रित मातृरूपा
हृत्पद्म राजित रमा कुशलेङ्गितज्ञा।
त्राणार्त जागरवशे उपविष्टिता श्री
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ १॥

श्रीरङ्गनाथ मनराज्ञि वरा सुनारी
उद्बोध्य लौकिकजनान् तव पादलाभे।
मालार्पणोत्सुकतया स्थित देवि गोदा
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ २॥

सर्वोपचारविधिना सहजेप्सु शेषो
मोक्षार्जपूर्तमनुवर्तमिहे प्रदिष्ट्वा।
वारित्ररूपवहने शयनात् प्रयातः
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ ३॥

वेदात्मको विहगराज तवानुभृत्यो
श्रुत्युक्त सर्वजगतां तव पारमत्वम्।
आदर्श्य संस्थितपरो मुकुरायमाने
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ ४॥

अन्योन्यभावमनुदृश्य तवेन्दिरायाः
त्वत्स्वाम्य लब्ध बलतो बहुधा समर्थो।
रक्षार्थने करवरं वरितो सुनाभो
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ ५॥

रामेऽवलम्बित विधेयमपूर्वभावं
सद्यः तनोति कृतधी तव सन्निधाने।
भक्ताग्रणिर्हनुमतो प्रणिपत्य तस्थो
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ ६॥

आर्षावतीर्ण पथदर्शित कूटमुख्यो
मोक्षानुभाव परिपूर्णितुमुर्विपादे।
त्वत्पादुका इव भवे पुनरास्थिताढ्यः
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ ७॥

भाष्यान्निरूपित पुरातन शेषि शास्त्रे
निर्णाय निश्चितविधौ तव ब्रह्मतत्वम्।
आनीतवान्यतिवरोऽङ्कित शिष्यकोटिं
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ ८॥

निर्धाय मार्गसुलभं स्थिर किङ्करत्वे
सम्मान्य दैविकपदात्तव दायकत्वम्।
घण्टारवेव घुषितो कवितार्किकेन्द्रो
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ ९॥

रामानुजप्रयत विस्तरमग्नचित्ताः
आशंसिता बहुगुणास्तव वर्धमाने।
त्वत्प्राप्तिसौख्यरसने गमिताः स्वशिष्यान्
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ १०॥

आत्मार्पणात्सुखमवाप्त सुवैष्णवेभ्यो
कैङ्कर्यवृत्तनिरताः तव पादमूले।
प्रार्थ्यन्ति सर्वजनतां सम भोगभाग्यं
भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ ११॥

स्वाभाविकाभिरुचिना तव सेवयुक्ताः
नित्योत्सवे अनिश सम्भृत दैवभक्ताः।

त्वत्पाददर्शन कुतूहलिनो स्थिता ते
    भूर्यब्धिनाथ तिरुवेङ्कट सुप्रभातम्॥ १२॥

श्रीशाब्जपाद दयितोद्धर आर्तबन्धो
    भूर्यब्धि वेङ्कटपते करुणासमुद्र।
गीतादियं स्मरितवान्तव शेषिनैजं
    गोप्तृत्वमाश्रितपरान् कृपया श्रयस्व॥ १३॥

॥ इति भूर्यब्धिनाथ सुप्रभातम् संपूर्णम्॥